... कृत (साहित्यम्)

"गाण्डीवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्षः" इत्यत्र पदपदांशदोषो वेति - विवेचनम्।

---

गाण्डीवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्षः।

'आङो यमहनः' (1/3/28) 'स्वाङ्गकर्मकाच्च' इत्यनुशासनबलात् आङ्पूर्वस्य हनः स्वाङ्गकर्मकस्यैवात्मनेपदं नियमितम्। इह तु तन्न सङ्गच्छत इति व्याकरणलक्षणहीनत्वात् च्युतसंस्कारत्वम्।

तत्र 'आजघ्ने' इति पदस्य एतेन दुष्टता अपितु 'विषमविलोचनस्य वक्षः' इति पराङ्गवाचिकपदान्तराकाङ्क्षयैवेति वाक्यघटकानेकपदप्रयोज्यत्वादस्य दोषे वाक्यदोषेति चेत्? नैवम्। तथा हि - गुणदोषालङ्काराणां शब्दार्थगतत्वेन व्यवस्थितेस्तदन्वयव्यतिरेकाऽनुविधायित्वं हेतुः। इह तु दोषस्य 'आजघ्ने' इति पदमात्रस्यैवान्वयव्यतिरेकाऽनुविधायित्वम्। पदान्तराणां परिवर्तनेऽपि अर्थात् विषमविलोचनस्य वक्षः इत्यस्य स्थाने त्रिनेत्रस्योरः इति पाठे कृतेऽपि, तस्य च्युतसंस्कारतादोषस्य तादवस्थ्यादिति पददोष एवायं न पुनर्वाक्यदोषः।

अपि च यथोक्तात्मनेपदस्य परिवृत्तौ 'आजघ्ने' इत्यस्य स्थाने आत्मनेपदं विहाय 'आजघान' इति परस्मैपदपाठे कृतेऽपि न दोषः, तथा तत् प्रकृतेरपि परिवृत्तौ 'आजघ्ने' इत्यस्य स्थाने 'प्रजहार' इति कृतेऽपि न दोषः। प्रकृतिप्रत्ययमेलनेन दोषत्वात् पददोष एवायं न पदांशदोषः।

अयमभिप्रायः - अत्र हि दोषस्य प्रकृतिप्रत्यययोः उभयोरेवाऽन्वयव्यतिरेकाऽनुविधायित्वात् प्रकृतिप्रत्यययोरंशस्यैव च पदरूपत्वात् पददोष एवायमिति सर्वमवदातम्।

इति दिक्।

उपेन्द्र झा
5/10/20
एसो० प्रो० साहित्य
का० सि० द० संस्कृत विश्वविद्यालय
दरभंगा

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)

'अमित: समित: प्राप्तैरुत्कर्षैर्हर्षद प्रभो ।
अहित: सहित: साधु यशोभिरसतामसि ॥'
पद्येऽस्मिन् व्यङ्ग्यार्थं प्रतिपादनम् ।

अमित: समित: प्राप्तैरुत्कर्षैर्हर्षद प्रभो ।
अहित: सहित: साधु यशोभिरसतामसि ॥ इति

इदं शब्दशक्त्या विरोधाभासालङ्कारस्योदाहरणम् । हे हर्षद != शत्रु हर्ष खण्डक ! मित्र हर्ष दायक प्रभो ! त्वं समित: = युद्धात् प्राप्तैरुत्कर्षै: = अतिशयै: निरुपमित मान: । अमित: = अपरिमित:, असतां = दुर्जनानां, अहित: = दण्डविधायकत्वेन शत्रुरसि ।

अत्र च: अमित: = मित्ररहित: च समित: = मित्र सहित: कथम् ? यश्च अहित: = हितरहित: च सहित: = हित सहित: कथमिति विरोध: । यच्च समित: = युद्धात्, प्राप्तैरुत्कर्षै: अमित:, तथा साधु यशोभि: सहित: असतां चाहित: इत्यर्थ करणेन निराक्रियते । विरोधाभासद्योतकयादि शब्दाभावाच्चात्र विरोधाभासोऽलङ्कारो व्यङ्ग्य: । इति ।

उपेन्द्र झा
4/11/20
स० प्रो० साहित्य
रा० आ० सं० महावि०
बुरकटेला, पूर्णियाँ

शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)

मम्मटोक्त काव्य लक्षणे अनलङ्कृती पुनः क्वापि पदस्य विश्लेषणं कृत्वा प्रतिपादनम्।

---

तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।

उक्त काव्य लक्षणे 'अनलङ्कृती पुनः क्वापि' इति पदं तदपि न युक्ति युक्तम्। अस्यार्थः - सर्वत्र सालङ्कारौ क्वचित्स्फुटालङ्कारावपि शब्दार्थौ काव्यमिति। तत्र सालङ्कारत्वमर्थयोरपि काव्ये उत्कर्षमात्राधायकत्वात् न तु स्वरूपाधायकत्वम्। यत्तु क्वचित्स्फुटालङ्कारत्वे उदाहृतम् —

'यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते॥' इति।

इत्यभिहितम्। अत्र हि विभावना विशेषोक्ति मूलस्य सन्देह सङ्करालङ्कारस्य स्फुटत्वम्।

वस्तुतस्तु 'यः कौमारहरः' इत्यत्र न कश्चन स्फुटोऽलङ्कारः। कारणाभावे कार्योत्पत्तिरूपस्य विभावनाऽलङ्कारस्य न स्फुटता। यतः उत्कण्ठाया कारणानां भावमुखेनैव वर्णनं न त्वभावमुखेन। एवं कारणसत्त्वेऽपि कार्यानुत्पत्ति रूपाया विशेषोक्तेरपि न स्फुटता। अर्थादत्र कारण कार्ययोरभाव कथनस्य अभिव्यक्तस्य सत्वेऽपि तद्वाच्ये न साहित्याऽनुपात्तत्वात्। यदि चेतोऽनुत्कण्ठितं नेत्यभिधीयेत तदा विशेषोक्तेः स्फुटत्वं भवेत्। अत्र उभयोरस्फुटत्वेन तन्मूलक सन्देहसङ्करोऽपि अस्फुटं इति निर्विवादम्।

---

उपेन्द्र झा
4/11/20
सहा० प्रो० साहित्य
रा० उ० सं० महावि०
कुरुक्षेत्रा, हरियाणा